# आदर्शप्रश्नपत्रम्
# हाईस्कूल परीक्षा–2012–13
# संस्कृतम् (सामान्यम्)

समय : घंटात्रयम् पूर्णांङ्काः 100

निर्देशः :– (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

1. उचित विकल्पं चित्वा लिखत– 4

(क) 'लभते' इत्यस्मिन् पदे धातुः अस्ति–

(अ) लाभ (ब) लब्धः

(स) लभ् (द) लभेः

(ख) 'सेवन्ते' इत्यस्मिन् पदे वचनम् अस्ति–

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्

(ग) 'गच्छामि' इत्यस्मिन् पदे पुरूषः अस्ति –

(अ) प्रथम पुरूषः (ब) मध्यम पुरूषः

(स) उत्तम पुरूषः

(घ) 'पचतु इत्यस्मिन् पदे लकारः अस्ति–

(अ) लृट लकारः (ब) लोट् लकारः

(स) लङ. लकारः (द) लट् लकारः

2. उचितं विकल्पं चित्वा लिखत– 4

(क) 'दर्शनीय्' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) शतृ (ब) अनीयर

(स) तव्यत् (द) शानच्

(ख) 'धर्म+ठक्' इत्यस्य पदं भविष्यति –

(अ) धार्मिकः (ब) धर्मम्

(स) धर्मः (द) धर्मस्य

(ग) 'टाप' प्रत्ययस्योदाहरणम् अस्ति–

(अ) बाल (ब) बाले

(स) बालः (द) बाला

(घ) 'गतः' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) क्त्वा (ब) क्त

(स) क्तिन् (द) टाप्

3. उचितं विकल्पं चित्वा लिखत– 4

(क) 'पुस्तकालयः' इत्यस्मिन् पदे संधिः अस्ति–

(अ) दीर्घ संधिः (ब) वृद्धि संधिः

(स) यण् संधिः (द) अयादि संधिः

(ख) 'सच्छीलः' इत्यस्मिन् पदे संधिः अस्ति–

(अ) विसर्ग संधिः (ब) व्यंजन संधिः

(स) गुण संधिः (द) पूर्वरूप संधिः

(ग) 'पौ+अकः' इत्यस्य संधिः अस्ति–

(अ) पावकः (ब) पवन

(स) पावक (द) पवाक

(घ) 'मनोरथः' इत्यस्य सन्धिविग्रहः अस्ति–

(अ) मनः+रथ (ब) मन+रथः

(स) मनः+रथः (द) मनो+रथ

4. उचितं विकल्पं चित्वा लिखत– 3

(क) 'वृक्षपतितः' इत्यस्मिन् पदे समासः अस्ति–

(अ) चतुर्थी तत्पुरूष (ब) कर्मधारय

(स) द्वन्द्व (द) पंचमी तत्पुरूषः

(ख) 'द्वन्द्व' समासस्योदाहरणम् अस्ति–

(अ) उपकृष्णम् (ब) पीताम्बर सः पितरौ

(स) पितरौ (द) घनश्यामः

(ग) 'अनुरूपम्' इत्यस्य पदस्य समास विग्रहः अस्ति–

(अ) रूपस्य योग्यम् (ब) अनुरूपस्य योग्यं

(स) रूपं योग्यम्

5. (क) अधोलिखितेषु अव्ययम् अस्ति– 4

(अ) गच्छ (ब) हस्

(स) हन् (द) अनु

(ख) 'सदाचारः एवं परमोधर्मः' अस्मिन् वाक्ये अव्ययय् अस्ति–

(अ) सदा (ब) एव

(स) परमो (द) धर्मः

(ग) अधोलिखितेषु उपसर्गः नास्ति–

(अ) प्र (ब) अनु

(स) परा (द) गम्

(घ) 'प्राचार्यः' इत्यस्मिन् पदे उपसर्गः अस्ति–

(अ) प्रति (ब) आचार्य

(स) परि (द) प्र

6. रिक्त स्थानं पूर्ति कुरुत – 2

क) मितं च ––––––––– च वचो हि वाग्मिता।

(अ) सारं (ब) सारः

ख) पठतो नास्ति –––––––––।

(अ) मुर्खतुम (ब) मूर्खत्वम्

7. अधोलिखित प्रश्नानाम् उत्तराणि एकपदेन लिखत–(केचन चत्वारः) 4

i. 'सुबाहुः' कस्य पुत्रः आसीत् ?

ii वरतन्तुशिष्यः कः आसीत् ?

iii. छत्रसालस्य पितुः नाम किम् ?

iv. दरिद्रता कया विराजते ?

v. मैत्रेयी कस्य पत्नी आसीत् ?

8. अधोलिखित प्रश्नानाम् उत्तराणि एकवाक्येन लिखत–(कंचित् त्रीणि) 6

i. कस्याः अपरं नाम् भगीरथी ?

ii. मानवीजीवनस्य उन्नत्यै अतिमहत्वपूर्ण किं भवति ?

iii. महाभारतं कस्याः परिचायक ग्रन्थाः ?

iv. सुरेन्द्रः कैः प्रक्रीड़ितः ?

9. प्रदतैः शब्दैः रिक्त स्थानपूर्तिं कुरुत (केचन चत्वारः) 4

यशः, बहवः, दुर्जनः, अर्थम्, भूतानि,

i. महर्षिः ––––––––––––– शरीरेण अमरः अस्ति।

ii. दानेन ––––––––– वशीभवन्ति।

iii. क्षमाशास्त्रं करे यस्य ––––––– किं करिष्यति।

iv. गुरूकुले––––––––– शिष्याः आसन्।

v. छत्रसालः––––––– वर्ष पर्यन्तम् अजीवत्।

10. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य–पुस्तकात् सुभाषित–द्वयं लिखत– 4

11. युग्ममेलनं कुरुत – 4

| | 'अ' | | 'ब' |
|---|---|---|---|
| क) | सर्पाः | – | भूषणम् |
| ख) | प्रथम स्वातन्त्र्य | – | घटोतकचः |
| ग) | वाग्भूषणम् | – | दयानन्देन जागरिता |
| घ) | पुरूषादः | – | बल्मीकेषु |

12. अधोलिखितानां चत्वारि शब्द रूपाणि त्रिषु वचनेषु लिखत– 4

क) राम– षष्ठी विभक्तिः

ख) पितृ– प्रथमा विभक्तिः

ग) राजन्– सम्बोधनं

घ) किम् (स्त्रीलिंग)– द्वितीया विभक्तिः

ङ.) युष्मद्– तृतीया विभक्तिः

13. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत(केचन चत्वारा:) 4

(क) परिश्रमः अस्माकं जीवनस्य उन्नत्यै भवति।

(ख) घटोत्कचः जनन्या आज्ञाप्तः।

(ग) गुरूकुल बहवः शिष्याः आसन्।

(घ) संस्कृतस्य व्याकरणं सर्वमान्य न अस्ति।

(ङ.) रामदेवः प्रातः स्मरणीयः आसीत्।

14. अधोलिखित गद्यांशेषु गद्यांशद्वयस्य उत्तराणि संस्कृत भाषायां देयानि। 10

क) गंङ्.गातीरे मार्कण्डेयः नाम कश्चन मुनिः स्म। तस्य गुरूकुले बहवः शिष्याः आसन्। वासुदेवः तस्य प्रिय शिष्यः। तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरूः तम् आहूय अवदत् "शिष्य्! अघुना भवान् सर्वविद्यापरङ्.गतः अस्ति। अतः इतः परं स्वग्रामं गन्तुम् अर्हति भवान्। गमनात् पूर्व भवता द्वारकापुरस्य देवराजस्य गृहं दृष्टवा आगन्तव्यम्। किन्तु गृहस्यान्तः न गन्तव्यम्" इति।

i. गङ्.गा तीरे कः वसति स्म ?

ii. बहवः शिष्याः कुत्र आसन् ?

iii. वासुदेवः कस्य प्रियशिष्यः आसीत् ?

iv. गुरूः शिष्यम् आहूय कदा अवदत् ?

v. सर्वविद्यापरंङ्.गतः कः अभवत् ?

ख) कस्मिंश्चित ग्रामे एकः प्राचीनः विशालः च न्यग्रोध वृक्षः आसीत्। सः पशुपक्षिभ्यः बहुविधेभ्यः जीवजन्तुभ्यः मनुष्येभ्यः अपि नित्यं बहुपकारकः आसीत्। पथिकाः तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म। पशवः छायार्थ वृक्षमिमं आश्रयन्ति स्म। पक्षिणः तस्य शाखासु नीडानि विरच्य वसन्ति स्म। सर्पाश्च तत्रत्येषु वल्मीकेषु वासं कुर्वन्ति स्म। एवं रीत्या स वृक्षः सर्वप्रियः सर्वहितः सर्वपेक्षित च आसीत्।

i. न्यग्रोधवृक्षः कुत्र आसीत् ?

ii. के मार्गायासं परिहरन्ति स्म ?

iii. पशवः छायार्थ कुत्र आश्रयन्ति ?

iv. 'विरच्य' शब्दस्य 'धातु' प्रत्ययं च पृथक कुरुत ?

v. 'ग्रामे' शब्दे का विभक्ति अस्ति ?

ग) भगीरथः दुःखितः अभवत्। सः पुनः तपः कृतवान्। शिवः तस्य पुरतः प्रत्यक्षः अभवत्। ''हे ईश ! नदीं भूमौ विसृजतु'' इति भगीरथः प्रार्थितवान्। तां प्रार्थनाम् अङ्.गीकृत्य शिवः नद्याः जलं भूमौ विसृष्टवान्। भगीरथः नदीं भूमितः पातालं नीतवान्।

i. भगीरथस्य पुरतः कः प्रत्यक्षः अभवत् ?

ii. भगीरथः किं प्रार्थितवान् ?

iii. प्रार्थनां अङ्.गीकृत्य शिवः किं कृतवान् ?

iv. भगीरथः नदीं कुत्र नीतवान् ?

v. 'अभवत्' इत्यस्य पदस्य धातुं पुरूषं च लिखत।

15. अधोलिखितपद्यांशेषु पद्यांशद्वयस्य प्रश्नानामुत्तराणि संस्कृतभाषायाम् लिखत– 5x2=10

(अ) गङ्.गा पापं शशी तापं दैन्यं कल्पतरूस्तथा।
पापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः।।

i. का पापं हन्ति ?

ii. शशी किं करोति ?

iii. कल्पतरूः किं हन्ति ?

iv. पापं तापं दैन्यं च के घ्नन्ति ?

v. 'पाप' इति शब्दस्य विलोम पदं लिखत।

(ब) वहन्ति वर्षन्ति नन्दन्ति भान्ति,
ध्यायन्ति, नृत्यन्ति, समाश्वसन्ति।
नद्यो घना मत्तगजाः बनान्ता,
प्रियाबिहीनः शिखिनः प्लवङ्.गमाः।।

i. कः वहन्ति ?

ii. के वर्षन्ति ?

iii. मत्तगजाः किं कुर्वन्ति ?

iv. के नृत्यन्ति ?

v. 'ध्यायन्ति' इति शब्दस्य धातुः, लकारः, पुरूषः, वचनश्च लिखत।

(स) ऊँ यज्जाग्रतो दूरमुदैति दैवं, तदु सुप्तस्य तथैवैति।

दूरङ्.गमं ज्योतिषां ज्योतिरेकं, तन्मे मनः शिवसङ्.कल्पमस्तु।।

i. कस्य मनः दूरम् उदैति ?

ii. कः दूरङ्.गम् अस्ति ?

iii. ज्योतिषाम् एकं ज्योतिः कः ?

iv. मे मनः किमस्तु ?

v. 'शिव' इति शब्दस्य विलोम शब्दं लिखत।

प्र.16 अधोलिखितेषु वाक्यानां कथानुसारेण क्रम संयोजन कुरुत 5

(क) उष्ट्रः यूथाद् भ्रष्टोऽभवत्।

(ख) सिंहेन उष्ट्रः मारितः।

(ग) रथकारः गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः।

(घ) वेन प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः।

(ङ.) बने प्रसववेदनया पीड्यमानाभ् उष्ट्रीम् अपश्यत्।

(च) रथकारः दारिद्रयोपहतः देशान्निष्क्रान्तः।

प्र.17 स्वस्य मित्रस्य कृते जन्मदिवसोत्सवस्य आमन्त्रणम् पत्रं संस्कृते लिखत। 4

अथवा

स्वस्य प्राचार्यस्य कृते छात्रवृत्यर्थं प्रार्थना पत्रं संस्कृते लिखत।

प्र.18 अधोलिखितेषु पंच अशुद्धवाक्यानां शुद्धिः करणीया। 5

i. मां मोदकं रोचते।

ii. दशरथः अयोध्यायाः राजा अस्ति।

iii. अहं फलम् खादति।

iv. पत्राः पतन्ति।

v. सर्वे बालकाः धावति।

vi. गणेशः नमः।

19. एक विषय स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत। 10

i. महाकवि कालिदासः

ii. उत्सवः

iii. छात्र जीवनम्

iv. अनुशासनम्

प्र.20 अधोलिखित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् संस्कृत भाषायाम् उत्तराणि लिखत– 5

सतां सज्जनानां, सड्.गति सम्पर्कः, संसर्गो वा सत्सड्.गतिः इति कथ्यते। वस्तुतः सत्सड्.गात एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं संसर्गजा दोषगुणाः भवन्ति।

अतः स्वसमुन्नति इच्छता जनेन सर्वदा सतामेव सड्.गतिर्विधेया।

i. के जनः सज्जनः भवति ?

ii. स्वसमुन्नतिम् इच्छता जनेन किं करणीयम् ?

iii. गद्यांशस्यास्य सारं लिखत।

iv. अस्य गद्यांशस्य शीर्षकं लिखत।

v. दुर्जनः शब्दस्य विलोम शब्दं लिखत।

# आदर्श–उत्तरपत्रम्
# हाईस्कूल परीक्षा–2012–13
# संस्कृतम् (सामान्यम्)

निर्देशः– प्रत्येक सही उत्तर पर 1 अंक प्राप्त होगा।

(1) **उचित विकल्प चयन**

| | | | |
|---|---|---|---|
| (क) | स. | लभ् | 4 |
| (ख) | स. | बहुवचनं | |
| (ग) | स. | उत्तम पुरूषः | |
| (घ) | ब. | लोट् लकारः | |

(2) **उचित विकल्प चयन** **4**

| | | |
|---|---|---|
| (क) | ब | अनीयर |
| (ख) | अ | धार्मिकः |
| (ग) | द | बाला |
| (घ) | ब | क्त |

(3) **उचित विकल्प चयन** **4**

| | | |
|---|---|---|
| क | अ | दीर्घ संधिः |
| ख | ब | व्यंजन संधिः |
| ग. | अ | पावकः |
| घ. | स | मनः+रथः |

(4) **उचित विकल्प चयन** **3**

| | | |
|---|---|---|
| क | द | पंचमी तत्पुरूषः |
| ख | स | पितरौ |
| ग | अ | रूपस्य योग्यम् |

(5) **उचित विकल्प चयन** **4**

| | | |
|---|---|---|
| क | द | अनु |
| ख | ब | एव |
| ग | द | गम् |
| घ | द | प्र |

**निर्देशः– प्रश्न क्रमांक 1 से 6 तक सही विकल्प लिखने पर प्रत्येक पर अंक 1–1 प्राप्त होगा।**

(6) 2

क अ सारं

ख ब मूर्खत्वम्

**निर्देशः:– सही विकल्प लिखने पर प्रत्येक पर 1–1 अंक प्राप्त होगा।**

(7) एक पदेन उत्तराणि 4

1 शत्रुघ्नस्य

2 कौत्सः

3 श्री चम्पतरायः

4 धीरतया

5. याज्ञवल्वयस्य

**निर्देशः– प्रत्येक एकपदेन उत्तर लिखने पर प्रत्येक पर 1–1 अंक प्राप्त होगा।**

(8) **एकवाक्येन उत्तराणि** 6

1 गड्.गयाः अपरं नाम भगीरथी।

2. मानवजीवनस्य उन्नत्यै परिश्रमः, अध्ययनं परोपकारः समयः उत्पादयः अतिमहत्वं पूर्णानि भवन्ति।

3. महाभारत भारतीय सनातन वैदिक संस्कृतेः परिचायक ग्रन्थः

4. सुरेन्द्रः वारिधरैः प्रक्रीडितः।

**निर्देशः– प्रत्येक एकवाक्येन उत्तराणि पर 1–1 अंक प्राप्त होगा।**

(9) **रिक्त स्थान पूर्ति** **4**

i) यशः

ii) भूतानि

iii) दुर्जनः

iv) बहवः

द्वयाशीतिः

**निर्देशः– प्रत्येक रिक्त स्थान पूर्ति पर 1–1 अंक प्राप्त होगा।**

**(10)** (1) गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम्। 4

केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः।।

(2) क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति।

अतृणे पतितो बह्निः स्वयमेवोपशाम्यति।।

**निर्देश :– एवमेव स्वपाठ्यपुस्तकात् कोऽपि शुद्धसुभाषितद्वय लेखनीयम्।**

**(11) युग्ममेलनं कुरूत** **4**

क बल्मीकेषु

ख. दयानन्देन जागरिता

ग. वाग्यभूषणम्– भूषणम्

घ. पुरूषादः – घटोत्कचः

**निर्देश :– प्रत्येक सही युग्ममेलन उत्तरों पर 1–1 अंक प्राप्त होगा।**

12. 4

| | | | |
|---|---|---|---|
| 1. | रामस्य | रामयोः | रामाणाम्ः |
| 2. | पिता | पितरौ | पितरः |
| 3. | हे राजन | हे राजानौ | हे राजानः |
| 4. | का | के | काः |
| 5. | त्वया | युवाभ्याम् | युष्माभिः |

13. शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत 4

(क) आम्

(ख) आम्

(ग) आम्

(घ) न

(ड.) आम्

14. अधोलिखित गद्यांशेषु गद्यांशद्वयस्य उत्तराणि संस्कृत भाषायां देयानि। 10

i) गंड्.गातीरे मार्कण्डेयः नाम कश्चन मुनिः वसति स्म।

ii) तस्य गुरूकुले बहवः शिष्याः आसन्।

iii) वासुदेवः तस्य प्रियशिष्यः।

iv) तस्य द्वादशवर्षात्मकम् अध्ययनं यदा समाप्तं तदा गुरूः तम् आहूय अवदत्–शिष्य् आहूय अवदत्

v) सर्वविद्या पारड्.गतः वासुदेवः अभवत।

ख)

i) न्यग्रोधनवृक्षः कस्मिंश्चित् ग्रामे आसीत्।

ii) पथिकाः भार्गायासं परिहरन्ति स्म।

iii) ''पशव'': छायार्थ वृक्षमिमम् आश्रयन्ति।

iv) 'वि' उपसर्ग रच्+ रच धातु+ ल्यप् प्रत्ययः।

v) ग्रामें सप्तमी विभक्तिः

घ)

i) भगीरथस्य पुरतः शिवः प्रत्यक्षः अभवत्।

ii) "हे ईश ! नदीं भूमौ विसृजतु" इति भगीरथ प्रार्थितवान्।

iii) प्रार्थनां अङ्गीकृत्यं शिवः नद्याः जलं भूमौ विसृष्टवान्।

iv) भगीरथः नदीं भूमितः पाताले नीतवान्।

v) "अभवत" भू + धातु प्रथमः पुरूषः।

15. अधोलिखितगद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत– 5x2=10

(अ)

i) गङ्गा पापं हन्ति।

ii) शशी तापं हन्ति।

iii) कल्पतरूः दैन्यं हन्ति

iv) पापं तापं दैन्य च सन्तोमहाशयाः घ्नन्ति।

v) 'पुण्यम्' इति।

(ब)

i) नद्यो वहन्ति।

ii) घनाः वर्षन्ति।

iii) मत्तगजाः नदन्ति।

iv) शिखिनः नृत्यन्ति।

v) ध्यायन्तिः ध्यै–धातु, लकारः–'लट्, पुरूषः–प्रथम वचनं–बहुवचनं

(स)

i) जाग्रतः मनः दूरम् उदैति।

ii) मनः दूरङ्गमम् अस्ति।

iii) ज्योतिषाम् एकं ज्योतिः मनः।

iv) मे मनः शिवसङ्कल्पणस्तु।

v) 'अशिव'।

16 अधोलिखितेषु वाक्यानां कथानुसारेण क्रम संयोजन कुरुत 5

(क) उष्ट्रः यूथाद् भ्रष्टोऽभवत्।

(ख) सिंहेन उष्ट्रः मारितः।

(ग) रथकारः गुर्जरदेशं गत्वोष्ट्रीं गृहीत्वा स्वगृहमागतः।

(घ) तेन प्रचुरा उष्ट्राः करभाश्च सम्मिलिताः।

(ड.) वने प्रसववेदनया पीड्यमानाभ् उष्ट्रीम अपश्यत्।

(च) रथकारः दारिद्रयोपहतः देशान्निष्क्रान्तः।

**निर्देश प्रत्येक प्रश्न के सही उत्तर लिखने पर 1–1 अंक प्राप्त होगा।**

उत्तर 17

जन्मदिनोत्सवस्य आमन्त्रणम्

प्रियमित्र प्रमोदः:
नमोनमः, } 1 अंक

महता हर्षेण सूचयामि यत् मम पुत्रस्य राहुलस्य प्रथमजन्मदिवसः 22/08/2012 दिनाड्.के रविवासरे समायोजितः अस्ति।

कृपया अवसरोऽस्मिन् अवश्यं समागत्य बालकाय स्वकीयं शुभाशीषं दत्वा कृतार्थयन्तु भवन्तः।

1 अंक

स्थानम् : गढ़ानगरं जबलपुरः

दिनांक : 22.08.2012

समय : सायं 6 वादनतः 8 वादनपर्यन्तम् विनम्रः 2 अंक

सुरेन्द्र चौहान

—————————————

छात्रवृत्ति निमितम् आवेदन पत्रम्

महोदयः !

सविनयं निवेदयामि यत् मम जनकस्य आर्थिकस्थितिः सम्यक् नास्ति। सः मम शिक्षार्थ प्रतिमास शुल्कं दातुम् असमर्थः अस्ति।

अतः श्रीमन्तः मह्यँ छात्रवृत्तिं दापयन्तु इति प्रार्थये।

दिनाँक : 24.08.2012

भवतां शिष्यः

उत्तम शर्मा

कक्षा दशमी 'अ'

उ.18 5

1. मह्मं मोदकं रोचते।
2. दशरथः अयोध्यायाः राजा आसीत्।
3. अहं फलं खादामि।
4. पत्राणि पतन्ति।
5. सर्वे बालकाः धावन्ति।
6. गणेशाय नमः।

उत्तर 19 10

1. महाकविः (कालिदासः)

महाकविः कालिदासः मम प्रियः कविः अस्ति। सः संस्कृत भाषायाः श्रेष्ठतमः कविः अस्ति। यादृशः रस–प्रवाहः कालिदासस्य काव्येषु विद्यते सादृशः अन्यत्र नास्ति। सः कविकुलशिरोमणिः अस्ति। कालिदासेन त्राणी नाटकानि, (माविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशकुन्तलम् च) द्वे महाकाव्ये (रघुवंशम् कुमारसंभवं च) द्वि गीतिकाव्ये (मेघदूतम ऋतु संहारम् च) च रचितानि।

कालिदासस्य लोकप्रियतायाः कारणं तस्य प्रसादगुणयुक्ता ललिता शैली अस्ति। कालिदासस्य प्रकृतिचित्रणं अतीव रम्यम् अस्ति। चरित्रचित्रणे कालिदासः अतीवरम्यम् अस्ति। चरित्रचित्रणे कालिदासः अतीव पटुः अस्ति।

कालिदासः महाराजविक्रमादित्यस्य सभाकविः आसीत्। अनुमीयते यत्तस्य जन्मभूमिः उज्जयिनी आसीत्। मेघदूते उज्जयिन्याः भव्यं वर्णनं विद्यते। कालिदासस्य कृतिषु कृत्रिमतायाः अभावः अस्ति।

कालिदासस्य साहित्ये काव्यसौन्दर्यं रसनिरूपणं च सर्वत्र दृश्यते। तस्य सूक्तयः सुधासिक्ताः चेतोहराः सन्ति। कालिदासस्य उपमा प्रयोगः, अपूर्वः अतः साधूच्यते– 'उपमा कालिदासस्य'।

————————————

2. उत्सवः

भारतवर्षे अनेके उत्सवाः भवन्ति। तेषु उत्सवेषु दीपावलिः एकः मुख्यः धार्मिकउत्सवः अस्ति। दीपावलीः कार्तिक मासे कृष्णपक्षे अमावस्यायां भवति। मनुष्याः गृहाणि सुधयां अंगनं च गोमयेन लिम्पन्ति। जनाः रात्रौ तैलेः वर्तिकाभिः च पूर्णान् दीपान् प्रज्ज्वालयन्ति। ते धनदेव्याः लक्ष्म्याः पूजनं कुर्वन्ति। बालाः बहु प्रकारकैः स्फोटकैः मनोविनोदयन्ति।दीपावली समये वणिजौऽपि स्वान् आपणान् सज्जयन्ति। नानाविधानि वस्तूनि क्रयविक्रयार्थ प्रसारितानि भवन्ति।इयं कालः नात्युष्णो नाप्यतिशीतो भवन्ति। तेन मोदन्तेऽस्मिन् महोत्सवे नराः नार्यश्च।

————————————

3. छात्रजीवनम्

छात्रजीवनमेव मानव जीवनस्य प्रभातवेला आधारशिला च वर्तते। समस्त जीवनस्य विकासस्य ह्यसस्य वा कारणम् एतज्जीवनमेवास्ति। वस्तुतः विद्यार्थी जीवनं साधना मयं जीवनम्।

छात्र जीवने परिश्रमस्य महती आवश्यकता वर्तते। यः छात्रः आलस्यं त्यक्त्वा परिश्रमेण विद्याअध्ययनं करोति स एव साफल्यं लभते। छात्रैः प्रातः काले ब्रह्म मुहूर्ते एव उत्थातव्यम्। छात्र जीवनं पूर्णतः अनुशासनबद्धं भवति। छात्र एव राष्ट्रस्यानुपमा निधिः अस्ति। विद्यार्थी जीवनमेव सम्पूर्णाआगामीजीवनस्य आधार शिला भवति। अतः तेषां सम्यक् रक्षणं, पोषणम् च कर्त्तव्यम्।

––––––––

4. अनुशासनम्

समाजे नियमानां पालनम् अनुशासनं भवति। जीवने अनुशासनस्य विशेष महत्व भवति। प्रत्येक पदे अनुशासनम् परमावश्यकम् अस्ति। अनुशासितः सर्वेभ्यः प्रियः भवति। सामाजिक व्यवस्था हेतु अनुशासनं अत्यन्तावश्यकम् अस्ति। यस्मिन् समाजे अनुशासनं न भवति। तत्र सदैव कलहः भवति। शिक्षकस्य अनुशासन छात्राः निरन्तरं उन्नति पथे गच्छन्ति। प्रकृतिः अपि ईश्वरस्य अनुशासने तिष्ठति। यः नरः पूर्णत्या अनुशासनं पालयति सः स्वजीवने सदा सफलः भवति।

अतः अनुशासनस्य पालनं जीवने बहु आवश्यक भवति।

**निर्देशः– दिये गये निबन्ध में से किसी एक विषय पर शुद्ध एवं सही दस वाक्य लिखने पर प्रत्येक वाक्य पर 1–1 अंक प्राप्त होगा।**

**उ. 20** अपठति गद्यांश 5

i. सज्जानां संसर्गेण जनः सज्जनः भवति।

ii. स्वसमुन्नतिम् इच्छला जनेन सर्वदा सतामेव सङ्गतिर्विधेया।

iii. गद्यांशस्यास्य सारः यत्–सर्वदा सतामेव सङ्गतिः इति।

iv. सत्सङ्गतिः

v. दुर्जनः शब्दस्य विलोम शब्दं 'सज्जनः' इति।